(ऋ. १०.७५.५)। इकारोऽनुदात्तः। शुतुद्रि इत्येतदामन्त्रितं पादादौ तस्मान् न निहन्यते, 'अनुदात्तं सर्वमपादादौ' (८.१.१८/४०३) इति। तस्य [1]प्रथममक्षरमुदात्तं तस्मिन् [2]परभूते पूर्वस्य [3]सरस्वति इति इकारस्य सन्नतर आदेशो भवति। माणवक जटिलकाध्यापक क्व गमिष्यसि। [4]क्व इति स्वरितस्तस्मिन् परभूते क इति अनुदात्तस्तस्य सन्नतर आदेशो भवति ॥

## अपृक्त एकाल्प्रत्ययः। (४१/२५१)

अपृक्तः इति इयं सञ्ज्ञा भवति[5] एकाल् यः प्रत्ययस्तस्य। [6]असहायवाची एकशब्दः। 'स्पृशोऽनुदके क्विन्' (३.२.५८/४३२) – [7]घृतस्पृक्। 'भजो ण्विः' (३.२.६२/२९७६)–अर्धभाक्। पादभाक्। एकाल् इति किम्? दर्विः (उ. ५०२)। जागृविः (उ. ५०३) (म. भा. १.२१३)। प्रत्यय इति किम्? सुराः[8]। अपृक्तप्रदेशाः–– 'वेरपृक्तस्य' (६.१.६७/३७५) [9]इत्येवमादयः ॥

## तत्पुरुषः समानाधिकरणः कर्मधारयः। (४२/७४५)

तत्पुरुषः (२.१.२२/६८४) इति समासविशेषस्य [10]सञ्ज्ञां वक्ष्यति।[11]स तत्पुरुषः [12]समानाधिकरणपदः कर्मधारयसञ्ज्ञो भवति। अधिकरणशब्दोऽभिधेयवाची। समानाधिकरणः समानाभिधेयः। परमराज्यम्। उत्तमराज्यम्। '[13]अकर्मधारये राज्यम्' (६.२.१३०/३८६४) इत्युत्तरपदाद्युदात्तं न भवति। [14]पाचकवृन्दारिका (६.३.४२/७४६)।तत्पुरुषः इति किम्? पाचिकाभार्यः (६.३.३७/८३८)। समानाधिकरणः इति किम्? ब्राह्मणराज्यम्। कर्मधारयप्रदेशाः–'[15]कर्मधारयेऽनिष्ठा' (६.२.४६/३७८०) इत्येवमादयः ॥

## प्रथमानिर्दिष्टं समास उपसर्जनम्। (४३/६५३)

प्रथमया विभक्त्या यन् निर्दिश्यते समासशास्त्रे तदुपसर्जनसञ्ज्ञं भवति। समासे इति [16]समासविधायि शास्त्रं गृह्यते। वक्ष्यति–'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' (२.१.२४/६८६) इति। द्वितीयासमासे द्वितीया इत्येतत् प्रथमानिर्दिष्टं, तृतीयासमासे तृतीया [17]इति, चतुर्थीसमासे चतुर्थी इति, पञ्चमीसमासे पञ्चमी इति, षष्ठीसमासे षष्ठी इति, सप्तमीसमासे सप्तमी इति। कष्टश्रितः। [18]शङ्कुलाखण्डः (२.१.३०/६९२)। यूपदारु (२.१.३६/६९८)। [19]वृकभयम् (२.१.३७/६९९)। राजपुरुषः (२.२.८/७०२)। [20]अक्षशौण्डः (२.१.४०/७१७)। उपसर्जनप्रदेशाः– 'उपसर्जनं पूर्वम्' (२.२.३०/६५४) इत्येवमादयः ॥

## एकविभक्ति चापूर्वनिपाते। (४४/६५५)

एका विभक्तिर्यस्य तदि[21]दमेकविभक्ति। समासे विधीयमाने यन् नियतविभक्तिकं, द्वितीये सम्बन्धिनि [22]बहुभिर्विभक्तिभिर्युज्यमानेऽप्येकयै[23]व विभक्त्या युज्यते तदुपसर्जनसञ्ज्ञं भवति अपूर्वनिपाते, [24]पूर्वनिपातं पूर्वनिपाताख्य-

---

1. भवति इत्यधिकम् ग. 2. परभूते नास्ति फ. 3. सरस्वतीकारस्य क. ड. ह. 4. क्व इति स्वरितःनास्ति फ. 5. कस्य इत्यधिकम् क, यः एकाल् प्रत्ययः सोऽपृक्तसञ्ज्ञो भवति फ. 6. असाहायवाची फ. 7. दलस्पृक् क, तैलस्पृक् फ, तिलस्पृक् ड, जलस्पृक् ह. 8. सुरां सुनोति इति णिप्। सुरासुतमाचष्टे इति णिचि टिलोपः, क्विप् सिलोपः। अत्र धातुसकारस्य 'हल्ङ्याब्भ्यः' इति लोपो न भवति इत्यधिकम् ड.ग.ह. 9. इत्यादयः ह. 10. सञ्ज्ञा वक्ष्यते फ.ग.ह. 11. स नास्ति फ. 12. समानाधिकरणं पदः ग. 13. अकर्मधारये––भवति नास्ति क. ड. फ. ग. 14. पाचिकवृन्दारिका ड. ह. 15. पुंवत् कर्मधारयजातीयदेशीयेषु' (६.३.४३/७४६) अ. क. 16. समासविधायकं फ. 17. इत्येतत् क. 18. शङ्कुलया खण्डः इत्यधिकम् ग. 19. वृक्षभयम् ग. 20. नास्ति ह. 21. इदं नास्ति क. 22. बह्वीभिः ग. 23. एव नास्ति फ. 24. पूर्वनिपातं नास्ति ड.